.. shrii muukaambikaayaaH aShTottarashatanaamaavaliH ..

# ॥ श्री मूकाम्बिकायाः अष्टोत्तरशतनामावलिः ॥

जय जय शङ्कर !
ॐ श्री ललिता महात्रिपुरसुन्दरी पराभट्टारिका समेताय
श्री चन्द्रमौळीश्वर परब्रह्मणे नमः !

ॐ श्रीनाथादितनूत्थश्री महाअक्ष्म्यै नमो नमः ।
ॐ भवभावित चित्तेजः स्वरूपिण्यै नमो नमः ।
ॐ कृतानङ्गवधूकोटि सौन्दर्यायै नमो नमः ।
ॐ उद्यदादित्यसाहस्र प्रकाशायै नमो नमः ।
ॐ देवतार्पितशस्त्रास्त्र भूषणायै नमो नमः ।
ॐ शरणागत सन्त्राण नियोगायै नमो नमः ।
ॐ सिम्हराजवरस्कन्ध सम्स्थितायै नमो नमः ।
ॐ अट्टहासपरित्रस्त दैत्यौघायै नमो नमः ।
ॐ महामहिषदैत्येन्द्र विघातिन्यै नमो नमः ।
ॐ पुरन्दरमुखामर्त्य वरदायै नमो नमः ।
ॐ कोलर्षिप्रवरध्यान प्रत्ययायै नमो नमः ।
ॐ श्रीकण्ठक्लृप्तश्रीचक्र मध्यस्थायै नमो नमः ।
ॐ मिथुनाकारकलित स्वभावायै नमो नमः ।
ॐ इष्टानुरूपप्रमुख देवतायै नमो नमः ।
ॐ तप्तजाम्बूनदप्रख्य शरीरायै नमो नमः ।
ॐ केतकी मालतीपुष्प भूषितायै नमो नमः ।
ॐ विचित्ररत्नसम्युक्तकिरीटायै नमो नमः ।
ॐ रमणीयद्विरेफालि कुन्तलायै नमो नमः ।
ॐ अर्धशुभ्राम्शु विभ्राजल्ललाटायै नमो नमः ।
ॐ मुखचन्द्रान्तकस्तूरी तिलकयै नमो नमः ।
ॐ मनोज्ञवक्रभ्रूवल्लीयुगलायै नमो नमः ।
ॐ रजनीशदिनेशाग्निलोचनायै नमो नमः ।
ॐ करुणारससम्सिक्त नेत्रान्तायै नमो नमः ।
ॐ चाम्पेयकुसुमोद्भासि नासिकायै नमो नमः ।
ॐ तारकाभ नसारत्न भासुरायै नमो नमः ।
ॐ सद्रत्नखचित स्वर्ण ताटङ्कायै नमो नमः ।
ॐ रत्नादर्शप्रतीकाश कपोलायै नमो नमः ।
ॐ ताम्बूलशोभितवरस्मितास्यायै नमो नमः ।
ॐ कुन्दकुट्मलसङ्काश दशनायै नमो नमः ।
ॐ फुल्लप्रवालरदन वसनायै नमो नमः ।
ॐ स्वकान्तस्वान्त विक्षोभि चिबुकायै नमो नमः ।
ॐ मुक्ताहारलसत्कम्बुकन्धरायै नमो नमः ।
ॐ साष्टापदाङ्गदभुज चतुष्कायै नमो नमः ।
ॐ शङ्खचक्रवराभीति कराब्जायै नमो नमः ।
ॐ मतङ्गजमहाकुम्भवक्षोजायै नमो नमः ।
ॐ कुचभारनमन्मन्जु मध्यमायै नमो नमः ।
ॐ तटित्पुञ्जाभकौशेय सुचेलायै नमो नमः ।
ॐ रम्यकिङ्किणिकाकाञ्ची रञ्जितायै नमो नमः ।
ॐ अतिमञ्जुलरम्भोरुद्वितयायै नमो नमः ।
ॐ माणिक्यमुकुटाष्टीव सम्युक्तायै नमो नमः ।
ॐ देवेशमुकुटोद्दीप्तपदाब्जायै नमो नमः ।
ॐ भार्गवाराध्यगाङ्गेय पादुकायै नमो नमः ।
ॐ मत्तदन्तावलोत्तम्स गमनायै नमो नमः ।
ॐ कुङ्कुमागरु भद्रश्री चर्चिताङ्ग्यै नमो नमः ।
ॐ सचामरामरीरत्न वीजितायै नमो नमः ।
ॐ प्रणताखिलसौभाग्य प्रदायिन्यै नमो नमः ।
ॐ दानवार्दितशक्रादि सन्नुतायै नमो नमः ।
ॐ धूम्रलोचन दैतेय दहनायै नमो नमः ।
ॐ चण्डमुण्डमहाशीर्ष खण्डनायै नमो नमः ।
ॐ रक्तबीजमहादैत्य शिक्षकायै नमो नमः ।
ॐ मदोद्धत निशुम्भाख्य भञ्जनायै नमो नमः ।
ॐ घोरशुम्भासुराधीश नाशनायै नमो नमः ।
ॐ मधुकैटभ सम्हार कारणायै नमो नमः ।
ॐ विरिञ्चिमुख सङ्गीत समज्ञायै नमो नमः ।
ॐ सर्वबाधाप्रशमनचरित्रायै नमो नमः ।
ॐ समाधिसुरथक्ष्माभृदर्चितायै नमो नमः ।
ॐ मार्कण्डेयमुनिश्रेष्ठ सम्स्तुतायै नमो नमः ।
ॐ व्यालासुरद्विषद्विष्णु स्वरूपिण्यै नमो नमः ।
ॐ क्रूरवेत्रासुरप्राण मारणायै नमो नमः ।
ॐ लक्ष्मी सरस्वती काली वेषाढ्यायै नमो नमः ।
ॐ सृष्टिस्थितिलयक्रीडा तत्परायै नमो नमः ।
ॐ ब्रह्मोपेन्द्रगिरीशादि प्रतीक्षायै नमो नमः ।
ॐ अमृताब्धिमणिद्वीप निवासिन्यै नमो नमः ।
ॐ निखिलानन्दसन्दोह विग्रहायै नमो नमः ।
ॐ महाकदम्बविपिन मध्यगायै नमो नमः ।
ॐ अनेककोटि ब्रह्माण्ड जनन्यै नमो नमः ।
ॐ मुमुक्षुजनसन्मार्ग दर्शिकायै नमो नमः ।
ॐ द्वादशान्त षडम्भोज विहारायै नमो नमः ।
ॐ सहस्रारमहापद्मसदनायै नमो नमः ।
ॐ जन्मप्रमुखषड्भाव वर्जितायै नमो नमः ।
ॐ मूलाधारादि षट्चक्रनिलयायै नमो नमः ।

ॐ चराचरात्मक जगत् सम्प्रोतायै नमो नमः ।
ॐ महायोगिजनस्वान्त निशान्तायै नमो नमः ।
ॐ सर्ववेदान्तसत्सार सम्वेद्यायै नमो नमः ।
ॐ हृदिनिक्षिप्त निःशेष ब्रह्माण्डायै नमो नमः ।
ॐ राजराजेश्वरप्राणवल्लभायै नमो नमः ।
ॐ तुषाराचलराजन्य तनयायै नमो नमः ।
ॐ सर्वात्म पुण्डरीकाक्ष सहोदर्यै नमो नमः ।
ॐ मूकीकृतमहामूकदानवायै नमो नमः ।
ॐ दुष्टमूक शिरः शैल कुलिशायै नमो नमः ।
ॐ कुटजोपत्यकामुख्य निवासायै नमो नमः ।
ॐ वरेण्य दक्षिणार्धाङ्ग महेशायै नमो नमः ।
ॐ ज्योतिश्चक्रासनाभिख्य पीठस्थायै नमो नमः ।
ॐ नवकोटि महद्दुर्गा संवृतायै नमो नमः ।
ॐ विघ्नेशस्कन्दवीरेश वत्सलायै नमो नमः ।
ॐ कलिकल्मष विध्वम्स समर्थायै नमो नमः ।
ॐ षोडशार्णमहामन्त्रमन्दिरायै नमो नमः ।
ॐ पञ्चप्रणवलोलम्ब पङ्कजायै नमो नमः ।
ॐ मिथुनार्चन संहृष्ट हृदयायै नमो नमः ।
ॐ वसुदेव मनोभीष्ट फलदायै नमो नमः ।
ॐ कम्सासुरवराराति पूजितायै नमो नमः ।
ॐ रुक्मिणीसत्यभामादि वन्दितायै नमो नमः ।
ॐ नन्दगोपप्रियागर्भ सम्भूतायै नमो नमः ।
ॐ कम्सप्राणापहरण साधनायै नमो नमः ।
ॐ सुवासिनी वधूपूजा सुप्रीतायै नमो नमः ।
ॐ शशाङ्कशेखरोत्सङ्ग विष्ठरायै नमो नमः ।
ॐ विभुधारिकुलारण्य कुठारायै नमो नमः ।
ॐ सञ्जीवनौषधत्रात त्रिदशायै नमो नमः ।
ॐ मातृसौख्यार्थि पक्षीश सेवितायै नमो नमः ।
ॐ कटाक्षलब्ध शक्रत्व प्रद्युम्नायै नमो नमः ।
ॐ इन्द्रक्लृप्तोत्सवोत्कृष्ट प्रहृष्टायै नमो नमः ।
ॐ दारिद्र्यदुःखविच्छेद निपुणायै नमो नमः ।
ॐ अनन्यभावस्वर्गापवर्गदायै नमो नमः ।
ॐ अप्रपन्न भवत्रासदायकायै नमो नमः ।
ॐ निर्जिताशेषपाषण्डमण्डलायै नमो नमः ।
ॐ शिवाक्षिकुमुदाह्लाद चन्द्रिकायै नमो नमः ।
ॐ प्रवर्तितमहाविद्या प्रधानायै नमो नमः ।
ॐ सर्वशक्त्यैकरूप श्री मूकाम्बायै नमो नमः ॥ॐ ॥

---

Encoded by R. Harshananda harshanand_16@rediffmail.com

---

Please send corrections to sanskrit@cheerful.com
Last updated August 18, 2002